International Journal of Education and Science Research Review
IJESRR
E-ISSN 2348-6457
Volume-1, Issue-4 September- 2014
P-ISSN 2349-1817
www.ijesrr.org
Email- editor@ijesrr.org

# सामवेद–सूक्ति–विमर्शः

**पं. रामदेवदीक्षितः**

व्याख्याता – यजुर्वेद

राजकीय महाराणा आचार्य संस्कृत महाविद्यालय, उदयपुर

- **शिक्षेयमस्मै दित्सेयं शचीपते मनीषिणे।**

**यदहं गोपतिः स्याम्।**

**सा० उ० 9/2/9/2**

**विमर्शः–** हे शचीपते अस्मै मनीषिणे शिक्षेयं दित्सेयं यत् अहं गोपतिः स्याम् इत्यन्वयः।

सूक्त्यात्मकोऽयं सामवेदीयो मन्त्रः शिक्षायै दानाय चेति प्रेरयन्निदमपि प्राह यदहमिन्द्रियाणि संयम्य सुखी यथा स्याम्, तथा विधातुमर्हता स्यादिति। शचीपते इत्यनेनेह परमात्मैव संग्राह्यः। वेदेषु सर्वत्रेन्द्रशब्देनात्मैव स्वीक्रियत इति। स एव कर्तुमकर्तुमन्यथाकर्तुमर्हः। तस्यैव भासा सूर्यस्तपति चन्द्रश्चाकाशे प्रकाशते। सूक्तस्याभिप्रायवचनमुररीकृत्य साररूपतयास्यार्थमपि ज्ञात्वा तथा प्रसारयेदस्य शिक्षणम् । दानं शिक्षणम् इन्द्रियदमोऽत्र त्रयो हि विषया विम्रष्टव्या इति धिया सुविचार्येह किंचिदुच्यते। दानमपि बहुविधं यज्ञे चरुर्दीयते, आज्यं दीयते पायसं दीयते। अत्रहि देवतानिमित्तकं दानन्तेन देवा चरुराज्यं पायसम्वा संलभ्यातृप्य च दातृभ्योऽन्नं धनं धान्यं बलमायुरारोग्यं मनोबलं बपुर्बलं सम्प्रदाय कृतार्थयन्तः लोक्यन्ते गीतायान्तु समुक्तं वासुदेवेन –

**देवान् भावयतानेन ते देवा भावयन्तु वः।**

**परस्परं भावयन्तः श्रेयं परमवाप्स्यथ॥** गीता०

दानमपि प्रामुख्येन भागवते महर्षिणा काव्येन पञ्चधा समुदीरितमष्टमस्कन्धे यथा –

**धर्माय यशसेऽर्थाय कामाय स्वजनाय च।**

**पञ्चधा विभजन् वित्तमिहामुत्र च मोदते॥** भाग०

धर्मकार्याय यशोलाभाय अर्जितवित्तवर्धनाय भोगाय तथा स्वकीयसम्बन्धिने यथातथं वित्तं विभज्य दातव्यम्। अनेन पञ्चधा वित्तविभागेन जनः ऐहिकमलौकिकञ्च मुदमश्रुत इति। अपरं बिन्दुशिक्षणमस्ति। वेदभगवान् समाह सर्वेषां शिक्षणमनिवार्य्यम्। एतत्किंप्रकारकमिति पृष्टे समुच्यते शास्त्रशिक्षणं शस्त्रशिक्षणं चरित्रशिक्षणमित्यादि विविधायितं हि तत् –

**विद्या नाम नरस्य रूपमधिकं प्रसन्न गुप्तं धनम्।**

**विद्या भोगकरी यशः सुखकरी विद्या गुरूणां गुरुः॥**

विद्यापि परा अपरा चेति द्विधेति उपनिषदाह निगमागमादि विद्या अपरा यया प्रेयः प्राप्यते। यदक्षरं ब्रह्मं तत्परा यया श्रेयः प्राप्यते।

मनुस्तु सदाचारशिक्षणविषये स्वमतं प्रदर्शयन्नाह –

**एतद्देशप्रसूतस्य सकाशादग्रजन्मनः।**

**स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः॥**

स्वं स्वं चरित्रं शिक्षेरन् पृथिव्यां सर्वमानवाः। पाणिनीयधातुपाठे **''शिक्ष्'' विद्योपादाने''** इति पठितन्तदर्थस्तु विद्याया उपादानम्। शिक्षकत्वेन व्यवहृतोऽध्यापकः आजीवनं किमपि किमपि शिक्षत एव तेनैव शिक्षा शनैः शनैः हृदि उपतिष्ठते नीतिकारस्त्वाह।

क्षणशः कणशश्चौव विद्यामर्थञ्च चिन्तयेत्। समाजे पूजास्थानं गुणन्तदर्थं विद्योपार्जनमत आह नीतिः –

**स्वदेशे पूज्यते राजा विद्वान् सर्वत्र पूज्यते।**

जीवो हि अल्पज्ञः, अल्पं ज्ञानमधिकं विधातुं यत्नेन भवितव्यन्तदाजीवनं किञ्चिज्ज्ञायते न खलु कश्चिन्नरः ज्ञाने पूर्णो भवतीति माघः प्राह –

**''नहि सर्वः सर्वं जानाति''**

जीवः पूर्णात् हि विलग्य वियुज्य वा पृथक् भवति, यावन्न पूर्णे विलीयते न तावत्पूर्णः इति मन्त्रः समाह यथा –

**पूर्णमदः पूर्णमिदं पूर्णात्पूर्णमुदच्यते।**

**पूर्णस्य पूर्णमादाय पूर्णमेवावशिष्यते॥**

गीतायामीश्वरः विषयेऽस्मिन् समीङ्गयन्नाह –

**''ममैवांशो जीव लोके जीवभूतः सनातनः''** गीता

कृष्णस्तु एकत्र प्राह तदवश्यं ध्यातव्यमवगन्तव्यं च तद्यथा –

**''एकांशेन स्थितो जगत्''**

एतदखिलं प्रमेयं दृश्यमानं जगन्ममैकांशेन विनिर्मितम्, तत्तर्हि विराजः परमेश्वरस्य ज्ञानं कल्पनातीतमाहोस्वित्कल्पनमपि किञ्चित्कल्पमेव –

**''स्वाध्यायान्मा प्रमदितव्यम्''**

**"अहरहः स्वाध्यायो ध्येतव्यः"**

**"स्वाध्यायप्रवचनाभ्यां मा प्रमदितव्यम्।"**

एतत्त्रयमपि उपनिषद्वाक्यं शिक्षार्थमेव ईश्यति –

**"अजरामरवत्प्राज्ञो विद्यामर्थञ्च चिन्तयेत्"**

हितोपदेशकारस्य नीति वाक्यमपि तथैवाह –

**"किं किं न साधयति कल्पलतेव विद्या" भोजप्रबन्धः**

विद्याशिक्षणं तद्दानमुभयत्र सञ्जयति आत्मानम् –

**"यस्योभयं तत् हि धुरि प्रतिष्ठापयितव्य एव"**

इति कालिदासीयं वचोऽपि हृदि निधाय निदिध्यासितव्यम्। उपर्युक्तं द्वयमपि कथं चरितार्थत्वं गच्छेत् इति समुक्ते वदति यद्यदा "दमः" स्यात्। दमोहि नाम बाह्येन्द्रियाणां निग्रहः। इन्द्रियाणि हयरूपाणि इतस्ततः धावन्ति नरं कुत्रापि गर्ते निपात्य तस्य जीवनलीलां विनाशयति, अतस्तेषां विनिग्रहोहि आवश्यकः। "दान्त" इति शब्दः शास्त्रेषु बहुधा ऋषिभिर्गीतः बाह्येन्द्रियनिग्रहायैवाङ्गी क्रियते।

अतः शिक्षार्थिभ्यः पद्यमिदं कतितिथं प्रगीयते यथा –

**"काकचेष्टा बकोध्यानं श्वाननिद्रा तथैव च।**

**अल्पाहारी गृहत्यागी विद्यार्थी पञ्चलक्षणम्॥"**

अष्टाङ्गयोगेऽपि दमस्य प्राथम्येनोल्लेखः सरीस्मार्यः –

**"शमदमोपरतितितिक्षादिषट्कसम्पतिः"** इति।

एवं शिक्षणं दानं दमश्चेति त्रयमपि तात्त्विकं तथ्यन्तदङ्गीकृत्य नरः सुखी स्यादिति मन्त्र उपदिशति। अस्माभिरूपदेशं मन्त्रस्यास्य विमृश्य यथायथं जीवने अवतारयेत्, तद्धि विस्तारयेत् अथ च शिक्षयेदिति शम्।

➢ **इच्छन्ति देवाः सुन्वन्तं न स्वप्राय स्पृहयन्ति।**

**यन्ति प्रमादमतन्द्राः॥**

**सा० उ० 9/2/3/3**

अतन्द्रा देवाः सुन्वन्तम् इच्छन्ति, स्वप्राय न स्पृहयन्ति, प्रमादञ्च यन्ति इति अन्वयः।

**अर्थः –** निरालसाः सुरा सुखमिच्छन्त्याप्रुवन्ति, स्वप्राय निद्रायै न स्पृहयन्ति प्रयतन्ते तथा प्रमादं प्रहलादं यन्ति अश्रुवत इति।

International Journal of Education and Science Research Review

Volume-1, Issue-4 September- 2014 E-ISSN 2348-6457 P-ISSN 2349-1817

www.ijesrr.org Email- editor@ijesrr.org

**विमर्शः** – साम्रः सुभाषितमिदमस्मभ्यमालस्यरहितस्योपदेशं प्रयच्छति। मन्त्रेऽस्मिन् एकमतन्द्रा इति देवस्य विशेषणम्। सुन्वन्तं प्रमादमिति द्वयं कर्म। स्वप्रायेति अपि कर्मैव परं स्पृहेः प्रयोगे **''स्पृहेरीप्सितः''** इति चतुर्थी तेन स्वप्रायेति चतुर्थ्यन्तं पदम्। इच्छन्ति स्पृहयन्ति यन्तीति तिस्रः क्रियाः। ऋषेरभिप्रायं विभावता मयकेह यथामति विमृश्यतेऽसौ मन्त्रः। अविद्यमाना तन्द्रा यस्येति अतन्द्रस्तेऽतन्द्रा इति सामासिकपदम्। निरालस्याय पदमिदं सम्बोध्य सङ्केयति यद्धि यो हि तन्द्रां विहाय निद्रां विसृज्य च कर्मारभते स सुखं समृद्धिम् आनन्दं प्रह्लादं विनोदमवाप्य सर्वदा सर्वथा मोदते। विषयेऽत्र नारायणपण्डितवाचा विनिःसृतमिदं रत्नं निद्रष्टव्यं तद्यथा –

**निद्रा तन्द्रा भयं क्रोधः आलस्यं दीर्घसूत्रता।**

**षड् दोषा पुरुषेणेह हातव्या भूतिमिच्छता॥**

अत्र निद्रा तन्द्रा आलस्यं दीर्घसूत्रतेति पदचतुष्टयं पृथक् – पृथक् भूत्वापि सामष्ट्यं भजमानमेकमेवार्थमभिदधानं लक्ष्यते। निद्रया तन्द्रया आलस्येन दीर्घसूत्रतया यथा समयं विधातव्यं कर्म क्षीयते। चाणक्यस्त्वाहेह –

**''समयवित् फलं भुंक्ते''**

**''कालेऽतीते काल एव फलमश्नुते''**

हिन्द्यामपि सूक्तमेव पापठ्यते यथा –

**''फिर पछताये होत क्या जब चिड़िया चुग गई खेत''**

अस्तु निद्रेति शब्दः **''द्रा कुत्सायां गतौः''** इति धातुः नि इत्युपसर्गः निद्राणमिति विगृह्य **''आतश्चोपसर्गे''** इति स्त्रियोऽधिकारेऽङ् प्रत्ययस्तेनायं निष्पाद्यते।

निद्रा शास्त्रसम्मता तु साध्वी परं तदितरा निश्चितमेव दुःखावाहिका। अत्रेदमेव निग्राह्यं यदधिकतरा निद्रा सुखं विनश्य दुःखाकरोति। तन्द्रेति शब्दः आलस्यमेव पूर्वापर भाविकात्वेनैव स्वीक्रियते जनैः। निद्रायाः पूर्वत्र याक्षिद्वयमेवार्धमर्धमुन्मेष–निमेषं विधत्ते, शरीरं भारयुक्तं, सत् विह्वलञ्च प्रयाति तदेवेदमुच्यते। अलस इति **''लस्''** विलसने धातुः, तस्मादचि कर्तरि सति लसः कश्चिद्विलासयुक्तः जनः। बहुव्रीहिणा **''अविद्यमानो लसो यस्ये''**ति विगृह्य अलसो जायते तस्य कर्म वा भाव इति ताद्धिकं ष्यञं विद्याय कर्मणि भावे वा आलस्यं स्यात् इदं हि विषादयुक्तत्वरूपमवगन्तव्यम्। यः विषीदति तमोगुणे निमज्जति नोत्सहते तादृशोऽलसस्तस्य अन्तर्गतो भावः स इव व्यवहारत्वमेव आलस्यं स्यात् शास्त्रे तस्य कृते **''जाल्मः''** हिन्द्यां **''जालिम''** इति शब्दः। यः कर्म अन्तरेण तिष्ठन् तिष्ठन् भुंक्ते पिबति आदिशति तादृश इति यावत्।

नीतिशास्त्रन्तु तत्राह यो हि एवं विधगुणोपेतस्तस्य जीवनं स्वस्मै परस्मै च परिपन्थिवद् भवति –

**''आलस्यं हि शरीरस्थो महान् रिपुः प्रविद्यते।**

**नास्त्युद्यम–समो बन्धुः कृत्वायं नावसीदति।''**

Volume-1, Issue-4 September- 2014 E-ISSN 2348-6457 P-ISSN 2349-1817
www.ijesrr.org Email- editor@ijesrr.org

आलस्यं शत्रुः उद्यमो बन्धुरिति। एतद्धि विचरणं वेदादेवागतमिति मन्त्रितव्यम्। को न नाम सुखमीप्सति। तत्तहि तस्मै प्रयत्नवता भवितव्यमेवेति पुनः शास्त्रवचनमिहाभिष्टूय किञ्चित् उद्यते, यथा –

**उद्योगिनं पुरुषसिंहमुपैति लक्ष्मीः,**

**दैवेन देयमिति का पुरुषा वदन्ति।**

**दैवं निहत्य कुरु पौरुषमात्मशक्त्या,**

**यत्ने कृते यदि न सिध्यति कोत्र दोषः॥** हित० ३३

नीतिकारस्त्वाह एवमपि तदपि पुरस्तात् दीयते पद्यम्, यथा –

**अनुद्योगेन तैलानि तिलेभ्यो नाप्तुमर्हति।** हित० – ३२

दैवमपि पुरुषार्थरूपमेव भवति परं यदि वयं पुनः पुनः तात्कालिकं कर्म कुर्मस्तहि पूर्वतनं दैवम् अद्यतनं साम्प्रतिकं कर्म च सम्भूय द्विगुणितं फलं दद्यात् अतः नारायणः सन्दर्भेऽत्र सम्यगाह यथा –

**पूर्वजन्मकृतं कर्म तद् दैवमिति कथ्यते।**

**तस्मात् पुरुषकारेण यत्नं कुर्यादतन्द्रितः॥३॥**

यजुषि वेदभगवान् तु पूर्वतममेव सम्यक् जगाद स्वमन्त्रदृशा मन्त्रेऽमुष्मिन् यथा–

**"कुर्वन्नेवेह कर्माणि जीजिविषेत् शतं समाः।"** यजु० – ४०६२

गीतापि अत्र आह –

**"शरीरयात्रापि च ते न प्रसिद्धयेदकर्मणः॥**

**कर्मणैव हि संसिद्धिमास्थिता जनकादयः॥"**

किरातार्जुनीयग्रन्थे तु द्रौपदी युधिष्ठिरं प्रति साध्यं साधयितुं प्रेरयन्तीत्थमुपदिशति, यथा –

**"शमेन सिद्धिं मुनयो न भूभृतः"**

महाभारते राधेयेण कर्म इत्थं सन्दर्भितं तदपि अत्र प्रदाय सीमीर्यते जनः यथा–

**"दैवायत्तं कुले जन्म मदायत्तं तु पौरुषम्॥"**

विश्वामित्रः यदा काशीनरेश आसीत्तदैकदा वशिष्ठाश्रममाप्यातिथ्येन तेन कृतेनाश्चर्यमनुभूय तस्य कारणमन्विष्य च कामधेनुं बलात्तस्मादानेतुं प्रयतमानोऽभूत् तदा वशिष्ठेन सत्रा युध्यता विश्वामित्रेण पराजितेन यदुदीरितं तद् द्रष्टव्यमेव। यथा –

**"धिग्बलं क्षत्रियबलं ब्रह्मतेजो बलं बलम्।"**

एतदखिलं तन्द्रितः निद्रितः न विधातुं सक्षमः अतः मन्त्राशयमनालस्याम् कृतयत्नैः भवितव्यम्।

का समुक्तिः समाजे बहुतिथं सुगीयते सा मयकापि साम्प्रतं स्मर्यते तां दातुमिह समुत्सुकः यथा –

**"वीरभोग्या वसुन्धरा।"**

इयं मेदिनी केन युज्यते इति पृष्टे समुद्यते वीरेण इति वीरस्स एव यः निरालसः अतन्द्रितः अनिद्रितश्च। विदुरोऽपि स्वकीय– विदुरनीतौ एवमेव भावं विभाव्य प्रस्तौति स यथा –

**"शूरश्च कृतविद्यश्च यश्च जानाति सेवितुम्।"** विदुरनीतिः

नचिकेतसा वटुना साकं ब्रह्मविद्यां चर्चयता भगवता यमेनाशयमेवविधमेवावेश्य हृदि यदुक्तं तदिह पुरो दीयते –

**"उत्तिष्ठत जाग्रत प्राप्य वरान्निबोधत,**

**क्षुरस्य धारा निशिता दुरत्यया।**

**दुर्गं पथ स्तत् कवयो वदन्ति॥"** क० उप०

**कृष्णः –** **श्रीमद्भगवद्गीतायामर्जुनं सम्बोध्याह यथा।**

**तस्माद्दुतिष्ठ कौन्तेय युद्धाय कृतनिश्चियः॥**

वाक्यमिदमाकर्ण्य क्लैब्यं विहाय गुडाकेशः युयोध युद्धं महाभारतं विजित्य वसुधाया समस्तं भोगं सुखं साम्राज्यम् अधिकारञ्चाप तथैव सन्देशमुररीकृत्य अस्माभिर्भारतीयैर्नरैरवश्यं विधातव्यं येनास्माकं भ्रातरः भगिन्य अकिञ्चना नराः जनताः सुखिनः समृद्धिशालिनः भवेयुरिति शम्।

- **आ त्वा विशन्त्विन्दवः समुद्रमिव सिन्धवः न त्वामिन्द्रातिरिच्यते।**

सा० पू० – 3/1/1/4

**हे इन्द्र! सिन्धवः समुद्रमिव इन्दवः त्वा आविशन्तु त्वान्नातिरिच्यत इत्यन्वयवाक्यम्।**

**अर्थः** – हे दीप्यमान! प्रकाश्यमान! परमैश्वर्यवन्! परमात्मन्! सिन्धवो नद्यः समस्ताः समुद्रं कूपारं प्रति प्रयन्ति, तत्राविश्य विलीयमाना सन्त एकाकारं यान्ति तथा इन्दवो हीन्द्रियवृत्तय इन्दुजातेन्द्रियव्यापाराः त्वामाविशन्तु विलीयन्ताम्। त्वामतिरिच्याधिकन्न किमपि विद्यत इति ऋषि समाशयः।

**विमर्शः** – समभ्यर्थनमिहात्मपरमात्मतत्त्वं प्रति ऋषिस्वान्तगतस्य दर्शनस्य एकमेवाद्वितीयस्य परिकल्पनात्प्राग्यथा सर्वस्य वस्तुनः वासुदेवपरकत्वमवगम्यत तथैवाध्यानमिह। कठोपनिषत्तु पूर्वमेव उपनिषद्युगे प्रोवाच यद्धि –

**"वाचारम्भणं विकारो नामधेयं मृत्तिकेत्येव सत्यम्"**

**नेह नानास्ति किंचन"**

नानात्वमपास्याद्वैतं प्रतिष्ठापयितुं यत्न उपनिषद्काराणाम्। व्यष्टित्वेन नानात्वं समष्टित्वेनैकत्वं पुरुषस्य बहुधा गीतमस्ति –

**"सर्वदेवनमस्कारः केशवं प्रति गच्छति"**

इति श्लोकोऽस्मभ्यमुपदिशन् नानात्वविहानायेरयति। जयपुरप्रापणाय पन्थानोऽनेके जयपुरमेकमेव तथैव उपासनाविधयो बहुधा गीता सन्ति परमेषामुपास्य एक एवेति। अयम् एव विचारः शङ्करप्रतिपादितोऽद्य विश्वम् एकस्मिन् सूत्रे ग्रथ्नाति –

| **अवस्था** | **व्यष्टि–आत्मा** | **समष्टि–आत्मा** |
|---|---|---|
| सुषुप्तिः | प्राज्ञः | ईश्वरः |
| स्पप्न | तैजसः | सूत्रात्मा |
| जाग्रत् | विश्वः | विराट् |

उपर्युक्तात्मोपहितः सन् एवं विवर्ण्यते। अनुपहितात्मा तु तुरीयः। उपनिषद्कारः प्राह यथा –

**"शिवमद्वैतं चतुर्थं मन्यन्ते"**

गीतायां वासुदेवस्तु व्यक्तं स्फीतञ्च जगाद यथा –

**मत्तः परतरं नान्यत्किञ्चिदस्ति धनञ्जयः।**

**मयि सर्वमिदं प्रोतं सूत्रे मणिगणा इव॥**

**"आत्मा वारे द्रष्टव्यः श्रोतव्यः निदिध्यासितव्यः"**

इत्युपनिषद्वाक्यन्तु आत्मनो दर्शनं श्रवणं निदिध्यासनमेव समादिशति। अस्य पन्थानः कति इत्यत्र न किञ्चित् भाषते। मार्गोऽप्येक एवेति न कुहचिदुल्लेखः। मार्गाणामनेकत्वं शास्त्रेषु बहुकृत्वः समुदीरितन्तदुपरिष्टात् विलिख्यते।

कश्चित् ज्ञानं, परः भक्तिम् अन्यः कर्म इति मार्गत्रयं निर्दिश्य तस्यायनाय सङ्केतयति श्रुतिः –

**"नान्यः पन्था विद्यतेऽयनाय"**

**(१) कर्मणैव हि संसिद्धिमास्थिता जनकादयः''**

**(२) भक्त्या त्वनन्यया शक्य अहमेवंविधोऽर्जुन''**

**(३) ऋते ज्ञानान्न मुक्तिः''**

त्रयोऽपि पन्थानः परमात्मानमेवाख्याति। विभिन्नः नद्यः परस्परं सम्मिल्यैकं पारावारं प्रयाति तथा नानात्वेन प्रतिभासमाना जीवाः अन्ते परमतत्त्वमेवाभियन्ति। एकत्वमतस्वीकारे को लाभ स्तदाह –

**''आत्मवत् सर्वभूतेषु यः पश्यति स पश्यति''**

विचारेऽत्र न हिंसा, न रागः, न द्वेषः, न शोकः, न मोहः, नासूया इति विभावना। तर्हि किं स्यात् भुवि वैकुण्ठावतरणम् श्रुतिराह –

**''तत्र को मोह कः शोकः एकत्वमनुपश्यतः''** यजु०

विभुत्वे व्यापकत्वे एकस्मिन्नप्याकाशे घटाकाशः, मठाकाशः इति व्यवहारः। एकस्मिन्नपि काले भूतकालः, भविष्यत्कालः, वर्तमानकाल इति व्यवहारः तथा आत्मनि एकस्मिन्नपि पृथक्–पृथक् भोगायतनगताविद्याभिरुपहित आत्मा पृथक्–पृथक् नामभिः गीयते परमार्थतस्तु आकाशवत् कालवत् स एक एव। अतो वासुदेवः पण्डितस्य परमार्थिनः संज्ञाम् एवं विदधौ यथा –

**''शुनि चौव श्वपाके च पण्डिताः समदर्शिनः''**

अपरत्र स एव परमात्मा पुनराह यथा –

**''आत्मौपम्येन सर्वत्र समं पश्यति योऽर्जुन।**

**सुखं वा यदि वा दुःखं स भोगी परमो मतः॥''**

पुष्पदन्तस्तु एनं भावं संकलय्य प्राह –

**''नृणामेको गम्यस्त्वमसि पयसामर्णव इव''**

शङ्करः एकत्वमतं संस्थाप्य विश्वस्मिन्नद्भुतोः परिव्राजको भूत्वा शङ्करावतार इति विद्वद्भिः गीतः सन् अभूतपूर्वां प्रतिष्ठामवाप। अद्यापि संसारे शङ्करसमो न भूतो न भविष्यतीति अनुमितं विदुषाम्। विवेकस्तु तस्यैव पद्धतिमनुकृत्यानुकृतिमान् बभूव। यद्यपि स आत्मा द्रष्टव्य इति गीतमपरं चर्मचक्षुषां स लक्ष्यत इति कथने नास्ति प्रभुः कोऽपि परं दृशेरनेकार्थत्वादिहानुभूत्यरूपं दर्शनमवध्यातव्यमत्र ''अनुभवात्मेति'' सर्वैः प्रोच्यतेऽनुभूयते च। स कथमिति कथनेऽकथ्यं मुखं यथा –

**आश्चर्यवत् पश्यति कश्चिदेनम्,**

**आश्चर्यवद् वदति तथैव चान्यः।**

**आश्चर्यवच्चौनमन्यः शृणोति,**

International Journal of Education and Science Research Review
Volume-1, Issue-4 September- 2014 E-ISSN 2348-6457 P-ISSN 2349-1817
www.ijesrr.org Email- editor@ijesrr.org

**श्रुत्वाप्येनं न वेद चैव कश्चित्॥** गीता

**"तत्त्वमसि"**

**"प्रज्ञानं ब्रह्म"**

**"अयमात्मा ब्रह्म"**

**"सोऽहम्"**

**"शिवोऽहम्"**

इत्यादिवाक्यैः स एवैकत्वेनाभिज्ञायते। भगवान् गीतायां प्राह यद्बहूनां जन्मनामन्ते ज्ञानवान् जीवः मां वेति यथा –

**"बहूनां जन्मनामन्ते ज्ञानवान् मा प्रपद्यते।**

**वासुदेव सर्वमिति स महात्मा सुदुर्लभः॥"**

अयं वासुदेव एव परमात्मेति श्रीमद्भागवतमपि प्राह–

**"सत्त्वं विशुद्धं वसुदेवशब्दितम्"**

वसुदेवे सत्त्वे विशुद्धे भवः योऽसौ वासुदेवः षोडशकलः कृष्णः एक एव कंसमल्लाङ्गणे कथम् अनेक इति निर्द्रष्टव्य पद्यद्वयेनेह –

**मल्लानामशनिर्नृणां नरवरः**

**स्त्रीणां स्मरो मूर्तिमान्**

**गोपानां स्वजनोऽसतां क्षितिभुजाम्**

**शास्ता स्वपित्रोः शिशुः॥**

**मृत्युर्भोजयते र्विराडविदुषाम्**

**तत्त्वं परं योगिनाम्**

**वृष्णीनां परदेवतेति विदतो**

**रङ्गं गतः साग्रजः॥ 10/43/17**

अयं साक्षात्परमात्मा एवेति शस्त्रोकोऽयमपि बभाण –

**"कृष्णस्तु भगवान् स्वयम्"**

व्यासोहि रासोत्सवे शख्वोकं प्रगायन्नाह पुनः तस्मै भगवानिति पदं यथा –

**"भगवानपि ताः रात्रीः शरदोत्फुल्लमल्लिकाः।**

**वीक्ष्य रन्तुं मनश्चक्रे योगमायामुपाश्रितः॥"**

उपर्युक्तो भगवानिति द्विः प्रयोगस्तदवगन्तव्यो वासुदेव एव स सर्वस्मिन् निवसति। सैवास्माभिः सर्वं विहाय उपासितव्य इति मन्त्राशयः।

- **भद्रा नो अग्निराहुतो भद्रा रातिः सुभग भद्रो अध्वरः। भद्रा उत प्रशस्तयः।**

**सा० पू० 2/1/2/5**

सुभग! नो भद्रा अग्निराहुतो भद्रा रातिः भद्रो अध्वरः। उत भद्रा प्रशस्तय इत्यन्वयः।

**अर्थः –** षडैश्वर्यवन् परमात्मन् अस्माकमाहुतोऽग्निः मङ्गलः स्यात् रातिः दानं यज्ञः वाण्यश्च नो कल्याणाय भवेयुरिति प्रार्थना।

**विमर्शः –** सुभग इति सम्बोधनपदम्। भग इति षोढा –

यथा – **ऐश्वर्यस्य समग्रस्य प्रभवः यशसः श्रियम्।**

**ज्ञानवैराग्ययोश्चौव षण्णां भग इतीङ्गना॥**

सूपसर्गेण सह संभूय भगः सुभगमभिधत्ते। षडैश्र्यवतो भगवतोऽत्र सम्बोधनं विधायर्षिराह स्वमनोगतं भावं यत् हे परमात्मन इति।

भगवान् परमात्मा ब्रह्मेति त्रितयमपि पदं ईश्वरमेवाख्याति यथा –

**वदन्ति तत्तत्त्वविदस्तत्त्वं यज्ज्ञानमद्वयम्।**

**ब्रह्मेति परमात्मेति भगवानिति शब्द्यते॥** भाग०

भजतेर्निष्पन्नोऽयं शब्दः परिभाषार्थं परिगृह्य अर्थान्तरे प्रयुज्यामनो दृश्यते शुश्रूषावत् यथा स्त्रीणं यानिरपि भगपदव्यपदिष्टा सा यथा पुत्रपुत्रीत्यादीनां कारणन्तथैवेश्वरोऽपि प्रमेयकारणम्। यद्धि कारणं तदेव ब्रह्मोच्यते। ब्रह्मसूत्रं रचयित्रा व्यासेन निजब्रह्मसूत्रे सूत्राणामन्यतममेतद्विज्ञेयं सम्प्रधार्य व्यलेखि यथा –

**"जन्माद्यस्य यतः"**

अत्र ब्रह्मणो लक्षणमुक्तम्। यतः इति पञ्चम्यं कारणमाह। यतो यस्मात् जननं जायते संसारस्य तद्धि ईश्वर इति। अतः मन्त्रे सुभगपदेन परात्परब्रह्मण एव स्वीकरणमङ्गीकर्त्तव्यमिति।

**"यतः सर्वाः प्रवृत्तयः"**

**''यतो वा इमानि भूतानि'' तै० ३०**

**''प्रक्रिया जगतो यतः'' वा० पदी०**

**''जम्माद्यस्य यतः'' भाग०**

**''जन्माद्यस्य यतः'' ब्रह्म० सूत्रम्**

एतत्पञ्चकं प्रमाणपुष्पमिह प्रदर्श्य स्वमतं प्रस्थापितम्। आहुतो रातिः अध्वरः प्रशस्तयः भद्रा भवेयुरिति समुक्तिः। आहुत इत्यनेन हव्यं रात्या दानमध्वरेण यज्ञः प्रशस्त्या वाक् गृहीता भवन्ति। कथमेषां भद्रतेति विभाव्यते किञ्चित्। भद्रमिति कल्याणमङ्गलभद्रकुशलनिरामयादिभ्य उक्तम्। हव्येनान्नमाज्यमिति हव्यं पवित्रं शुद्धञ्च ग्राह्यम्। दानमपि शुद्धं यज्ञोऽपि शुद्धः प्रशस्तिरपि विशुद्धा एषां पावितेन जीवनमैहिकमामुत्रिकञ्च निरामयं स्यात्। सर्वेषां मद्रत्वकामः कथमिति समूह्य वक्तव्यं दीयते यन्मानसं शारीरं पावनमेव जीवनस्य चरमं लक्ष्यम्। तस्मै प्रयत्नवद्भिरस्माभिरनिशं विधीयते विधास्यते विहितञ्च। भगवान् वेदस्तु अत्र आह यथा—

**''भद्रं कर्णेभिः श्रृणुयामदेवाः''**

**''आ नो भद्राः कतवो''**

**''शतमदीनाः स्याम''**

**''पवित्रेस्थो वैष्णव्यो''**

**''पावका नः सरस्वती''**

**''शुद्धबालः सर्व शुद्धबालः''**

**''यथेमां वाचं कल्याणी''**

**''वाचं ते शुन्धामि''**

**''यज्ञेन यज्ञमय''**

**''देहि मे ददामिते''**

**''केवलादी केवलाघी भवति''**

एषां मन्त्राणां सन्देशस्तु मानवजीवनायापरिहार्यः। **''संस्कृतिः संस्कृताश्रिता''** अनेन ज्ञातं भवति यत् संस्कृतमबलम्ब्यैव संस्कृतिरवतिष्ठेत तद्वदेवास्माकं जीवनमूल्यम् ऋषिप्रगीताधिमन्त्रमेव निहितेनोच्चतमेन भावेन संस्कारेण विचारेण पवित्रेण वयमनुस्यूता सन्तः सुखमयं जीवनं यापयितुमर्हा नो चेत्पशुभिः समानं नः जीवनमतः मन्त्राशयमभिज्ञायतत्संदेशञ्च मनसि निधाय तथैव व्यवहारे विधाय क्रियावद्भिः विद्वद्भिर्भवितव्यम्।